A Comprehensive Guide to

# AYURVEDIC CASE RECORDING

**Prof. Dr. S. N. Ojha**




# Prof. Dr. S. N. Ojha

M.D Ph.D

Principal
Dr. D. Y. Patil College of Ayurved and Research Centre
Pune

http://drojha.wordpress.com
www.drojha.com

**Write to us at**
Info.drojha@gmail.com



**All rights reserved © 2012**

# ।। रूग्ण विवेचनम् ।।

| | | |
|---|---|---|
| रूग्ण नाम | – | |
| वय | – | |
| लिंग | – | |
| जाति | – | |
| निवास | – | |
| व्यवसाय | – | |
| शिक्षण | – | |
| वैवाहिक स्थिती | – | विवाहित /अविवाहित |
| ऋतू | – | |
| काल | – | |
| देश | – | निवास,जन्म, वृद्धि, स्वजन |
| प्रवेश तिथी | – | |
| निर्गमन तिथी | – | |
| रूग्ण क्र. | – | |
| वर्तमान लक्षणानि व अवधि | – | |

वर्तमान व्याधी वृत्तांत –

पूर्वोत्पन्न व्याधी वृत्तांत –

पूर्वोत्पन्न व्याधी चिकित्सा –

कुलवृत्त – मातृकुल –

पितृकुल –

स्वकुल –

रूग्ण परिचर्या – (दैनंदिन)– व्यसन इ.

प्रश्न परीक्षणानि –

सामान्य स्त्रोतस दुष्टी कारणानि –

चरक – आहार: } दोषगुणै: समः

विहार :

धातुभि : विगुण:

सामान्य स्त्रोतस दुष्टी लक्षणानि –

चरक – अतिप्रवृत्ती

सङ्ग.

सिराणां ग्रन्थयोऽपि

विमार्गगमनम्

स्त्रोतस दुष्टी कारणानि

स्त्रोतस दुष्टी लक्षणानि

## १) प्राणवह स्त्रोतस

| | | | |
|---|---|---|---|
| चरक | – क्षयात् | चरक | – अतिसृष्टम् |
| | संधारणात् | | अतिबध्दम् |
| | रौक्ष्यात् | | कुपितम् |
| | व्यायामात् | | अल्पाल्पमभीक्ष्णं |
| | क्षुधितस्य | | सशब्दशूलं उच्छवसन्तम् |
| सुश्रुत– | विध्दस्य | सुश्रुत – | आक्रोशन |
| | | | विनमन |
| | | | मोहन |
| | | | भ्रमण |
| | | | वेपनानि |
| | | | मरणं |

## २) उदकवह स्त्रोतस

| | | | |
|---|---|---|---|
| चरक – | औष्ण्यात् | चरक– | जिव्हा |
| | आमात् | | तालु |
| | भयात् | | ओष्ठ |
| | पानात् | | कंठ |
| | अतिशुष्कान्नसेवनात् | | क्लोम |
| | तृष्णाया: अतिपीडनात् | | शोषं |
| | | | पिपासा |
| सुश्रुत– | विध्दस्य | सुश्रुत – | शोष: |
| | | | पिपासाम् |
| | | | सदयोमरणं |

## ३) अन्नवह स्त्रोतस–

| | | | |
|---|---|---|---|
| चरक | –अतिमात्रस्य, अकाले, अहितस्य } भोजनात् | चरक | –अनन्नाभिलषणम् |
| | | | अरोचकम् |
| | | | अविपाकौ |
| | पावकस्य वैगुण्य | | छर्दिम् |
| सुश्रुत– | विध्दस्य | सुश्रुत – | आध्मानं |
| | | | शूल |

अन्नद्वेष
छर्दिम्
पिपासाम्
आन्ध्यं
सद्योमरणं

**४) रस वह स्त्रोतस–**

**चरक –**

गुरू
शीतम्
अतिस्निग्धम् } अश्नताम्
अतिमात्रम्
चिन्त्यानां अतिचिंतनात्

**चरक –**

अश्रध्दा
अरूचि
आस्यवैरस्य
अरसज्ञता
हृल्लास
गौरवम्
तन्द्रा
अंगमर्द:
ज्वर:
तम:
पाण्डुत्वम्
स्त्रोतसां रोध:
क्लैब्यम्
साद:
कृशांगता
नाशोऽग्नि:
अकालं वलय: पलितानि

**सुश्रुत –** विध्दस्य

**सुश्रुत –** शोष
प्राणवहविध्दवच्च– मरणम्

५ ) रक्तवह स्त्रोतस–

चरक – विदाही अन्नानि
विदाही पानानि
स्निग्ध
उष्ण
द्रवाणि
भजतां आतपानलौ

सुश्रुत – विध्दस्य

चरक – कुष्ठ
विसर्प
पिडका
रक्तपित्त
असृग्दर:
गुदमेढ्रास्यपाक:
प्लीहावृध्दी
गुल्म
विद्रधि
नीलिका
कामला
व्यङ्ग
पिप्लु
तिलकालक
दद्रु
चर्मदल
श्वित्र
पामा
कोठ
अस्त्रमंडलम्

सुश्रुत – श्यावांगता
ज्वर
दाह
पाण्डुता
शोणितागमनम्
रक्तनेत्रता

**६) मांसवह स्त्रोतस –**

चरक – अभिष्यंदीनि भोज्यानि
स्थूल भोज्यानि
गुरू भोज्यानि
भुक्त्वा च स्वपतां दिवा

चरक – अधिमांस
अर्बुद
कीलं
गलशालूक
शुण्डिके
पूतिमांस
अलजी
गण्ड
गण्डमाला
उपजिव्हिका

सुश्रुत – विध्दस्य

सुश्रुत – श्वयथु
मांसशोष
सिराग्रन्थयो:
मरणम्

**७) मेदवह स्त्रोतस –**

चरक– अव्यायामात्
दिवास्वप्नात्
मेद्यानां च अतिभक्षणात्
वारूण्या:च अतिसेवनात्

चरक – अधिमांस
अर्बुद
कीलं
गलशालूक
शुण्डिके
पूतिमांस
अलजी
गण्ड
गण्डमाला
उपजिव्हिका
दन्तादीनां मलाढयत्व:
पाणिपादयो: दाह:
चिक्कणता देहे
तृट्
स्वाद्वास्यं च जायते

सुश्रुत – विध्दस्य

सुश्रुत – स्वेदागमनं
स्निग्धांगता:
तालुशोष:
स्थूलशोफता
पिपासाम्

**८) अस्थिवह स्त्रोतस –**

चरक– व्यायामात्
अतिसंक्षोभात्
अस्थ्नामतिविघट्टनात्
वातलानां च सेवनात्

चरक– अध्यस्थि
अधिदन्तौ
दन्तास्थिभेद / शूल
विवर्णता
केश, लोम, नखश्मश्रुदोषा:

**९) मज्जावह स्त्रोतस –**

चरक– उत्पेषादत्
अत्यभिष्यंदात्
अभिघातात्
प्रपीडनात्
विरूद्धानां च सेवनात्

चरक – रूक् पर्वणाम्
भ्रम:
मूर्च्छा
दर्शनं तमस:
अरूषां स्थूलमूलानाम्
पर्वजानां च दर्शनम्

**१०) शुक्रवह स्त्रोतस –**

चरक –अकाल योनिगमनात्
निग्रहात्
अतिमैथुनात्
शस्त्रक्षार अग्निभि:

चरक –क्लैब्यम्
अहर्षणम्
रोगी वा क्लीबम् अल्पायुर्विरूपं वा
प्रजायते ।
न जायते गर्भ :पतति, प्रस्त्रवति ।
शुक्रं हि दुष्टं सापत्यं सदारं
बाधते नरम् ।

सुश्रुत – विध्दस्य

सुश्रुत – क्लीबता
चिरात् प्रसेको
रक्तशुक्रता

## ११) मूत्रवह स्त्रोतस –

| | | | |
|---|---|---|---|
| चरक – | मूत्रितोदक भक्ष्य<br>मूत्रित स्त्रीसेवनात्<br>मूत्रनिग्रहात्<br>क्षीणस्य<br>अभिक्षतस्य | चरक – | अतिसृष्टम्<br>अतिबध्दम<br>प्रकुपितम्<br>अल्पाल्पमभीक्ष्णम्<br>बहलम्<br>सशूलम्<br>} मूत्रयन्तम् |
| सुश्रुत – | विध्दस्य | सुश्रुत – | आनद्धबस्तिता<br>मूत्रनिरोध:<br>स्तब्धमेढ्रता |

## १२) पुरीषवह स्त्रोतस –

| | | | |
|---|---|---|---|
| चरक – | संधारणात्<br>अत्यशनात्<br>अजीर्णात्<br>अध्यशनात्<br>दुर्बलाग्नि:<br>कृश: | चरक – | कृच्छ्रेण<br>अल्पाल्पम्<br>सशब्द<br>शूलम्<br>अतिद्रवम्<br>अतिग्रथितम्<br>अतिबहु उपविशन्तम् |
| सुश्रुत – | विध्दस्य | सुश्रुत – | आनाह<br>दुर्गन्धता<br>ग्रथितान्त्रता |

## १३) स्वेदवह स्त्रोतस –

| | | | |
|---|---|---|---|
| चरक – | व्यायामात् | चरक – | अस्वेदनम् |

अतिसंतापात् — अतिस्वेदनम्
शीत, उष्ण } क्रमसेवनात् — पारूष्यम्
क्रोध — अतिश्लक्ष्णतामंगस्य
शोक — परिदाहम्
भय — लोमहर्षम्

१४) आर्तववह स्त्रोतस –

सुश्रुत – विध्दस्य

सुश्रुत – वन्ध्यात्वं
मैथुनासहिष्णुत्वं
आर्तवनाश

निष्कर्ष :–

## चरक मतानुसारेण विकृत वात, पित्त, कफ लक्षणानि –

१) पित्त, कफ ↑ वायु ↓

हीनवातस्य तु श्लेष्मा पित्तेन सहितश्चरन् । करोत्यरोचकापाकौ सदंन गौरवं तथा ।
हृल्लासमास्य स्रवणं पाण्डुतां दूयनं मदम् ।विरेकस्य च वैषम्यं वैषम्यमनलस्यच ।।

च. सू. १७/५३,५४

२) कफ, वायु↑ पित्त ↓

हीनपित्तस्य तु श्लेष्मा मारूतेनोपसंहित: । स्तम्भं शैत्यं च तोदं च जनयत्यनवस्थितम् ।।
गौरवं मृदुतामग्नेर्भक्ताश्रध्दां प्रवेपनम् । नखादीनां च शुक्लत्वं गात्रपारूष्यमेव च ।।

च. सू. १७/५५,५६

३) वात पित्त↑ कफ ↓

मारूतस्तु कफे हीने पित्तं च कुपितं द्वयम् । करोति यानि लिङ्गानि श्रृणु तानि समासत:।।
भ्रममुद्वष्टनं तोदं दाहं स्फुटनवेपने । अङ्गमर्दं परीशोषं दूयनं धूपनं तथा ।।

च. सू. १७/५७,५८

४) वात, पित्त ↓ कफ↑

वातपित्तक्षये श्लेष्मा स्त्रोतांस्यपिद्धद्भृशम् । चेष्टाप्रणाशं मूर्च्छां च वाक्सङ्गंच करोति हि ।।

च. सू. १७/५९

५) वात, श्लेष्मा ↓ पित्त ↑

वातश्लेष्मक्षये पित्तं देहौज: स्रंसयच्चरेत् । ग्लानिमिन्द्रियदौर्बल्यं तृष्णां मूर्च्छां क्रियाक्षयम् ।।

च. सू. १७/६०

६) पित्त, कफ ↓ वायु↑

पित्तश्लेष्मक्षये वायुर्मर्माण्यतिनिपीडयन् । प्रणाशयति संज्ञां च वेपयत्यथवा नरम् ।।

च. सू. १७/६१

निष्कर्ष :–

७) वात –

कुपितस्तु खलु शरीरे शरीरं नानाविधैर्विकारैरूपतपति बलवर्णसुखायुषामुपघाताय,मनो व्याहर्षयति,सर्वेन्द्रियाण्युपहन्ति,विनिहन्ति गर्भान् विकृतिमापादयत्यतिकालं वा धारयति, भयशोकमोहदैन्यातिप्रलापाञ्जनयति, प्राणांश्चोपरूणद्धि ।।

च. सू. १२/८

८) पित्त –

अग्निरेव शरीरे पित्तान्तर्गत: कुपिताकुपित: शुभाशुभानि करोति; तद्यथा– पक्तिमपक्तिं दर्शनमदर्शनं मात्रामात्रत्वमूष्मण: प्रकृतिविकृतिवर्णौ शौर्यं भयं क्रोधं हर्षं मोहं प्रसादमित्येवमादीनि चापराणि द्वन्द्वानीति ।।

च. सू. १२/११

९) कफ –

सोम एव शरीरे श्लेष्मान्तर्गत: कुपिताकुपित: शुभाशुभानि करोति; तद्यथा– दाढर्यं शैथिल्यमुपचयं कार्श्यमुत्साहमालस्यं वृषतां क्लीबतां ज्ञानमज्ञानं बुद्धिं मोहमेवमादीनि चापराणि द्वन्द्वानीति ।।

च. सू. १२/१२

निष्कर्ष :–

**क्षय वृद्धि लक्षणानि :**

| क्षय | वृद्धि |
|---|---|
| १) वात –<br>तत्र वातक्षये मन्दचेष्टता ऽल्पवाक्त्वमप्रहर्षो मूढसंज्ञता च ।। सु. सू. १५/११<br><br>प्रसेकारूचिहल्लास संज्ञामोहल्पवाक् चेष्टता प्रहर्षाङ्गसादाग्नि वैषम्यादिभि: क्षीणो वायु: पीडयति ।<br>अ. सं. सू. १९/९ | तत्र वातवृद्धौ वाक्पारूष्यं कार्श्यं कार्ष्ण्यं गात्रस्फुरणमुष्णकामिता निद्रानाशोऽल्पबलत्वं गाढवर्चस्त्वं च ।<br>सु. सू. १५/१८<br>कार्श्य कार्ष्ण्यं गात्र कंप स्फुरणोष्णकामिता संज्ञा निद्रानाशबलेन्द्रियोपघात अस्थिशूल मज्जाशोष मलसंगाध्मानाटोप मोह दैन्य भय शोक प्रलाप आदिभिर्वृद्धो वायु: पीडयति ।।<br>अ. सं. सू. १९/६ |
| २) पित्त –<br>पित्तक्षये मन्दोष्माग्निता निष्प्रभता च ।<br>सु. सू. १५/११<br><br>स्तम्भशैत्यानियत तोददाहारोचकाविपाकाङ्गपारूष्यकम्प – गौरवनखनयन शौक्ल्यादिभि: पित्तम् ।<br>अ. सं. सू. १९/९ | पित्तवृद्धौ पीतावभासता सन्ताप: शीतकामित्वमल्पनिद्रता मूर्च्छा बलहानिरिन्द्रियदौर्बल्यं पीतविण्मूत्रनेत्रत्वं च ।<br>सु. सू. १५/१८<br>पीतत्व ग्लानी इन्द्रियदौर्बल्यौजोविस्त्रंसशीताभिलाष दाहतिक्तास्यता तृट् मूर्च्छाऽल्पनिद्रता क्रोधादिभि: पित्तम् ।<br>अ. सं. सू. १९/६ |
| ३) कफ –<br>श्लेष्मक्षये रूक्षताऽन्तर्दाह आमाशयेतरश्लेष्माशयशून्यता सन्धिशैथिल्यं तृष्णा दौर्बल्यं प्रजागरणं च ।<br>सु. सू. १५/११<br>भ्रमोद्वेष्टनानिद्राङ्गमर्द परिप्लोष तोदवददाहस्फोटनवेपन धूमायनसन्धि शैथिल्य हृदयद्रवश्लेष्माशयशून्यतादिभि:श्लेष्मा ।।<br>अ. सं. सू. १९/९ | श्लेष्मवृद्धौ शौक्ल्यं शैत्यं स्थैर्यं गौरवमवसादस्तन्द्रानिद्रा सन्धि विश्लेषश्च ।<br>सु. सू. १५/१८<br>श्वैत्यशैत्यस्थौल्यास्यगौरवांङ्गसाद स्त्रोत: पिधान मूर्च्छानिद्रातंद्रा श्वासकास प्रसेक हल्लासाग्निसाद संधि विश्लेषादिभि: श्लेष्मा ।।<br>अ. सं. सू. १९/६ |

**निष्कर्ष :–**

Prof. Dr. S. N. Ojha

| क्षय | वृद्धि |
|---|---|
| १) रस – <br> घट्टते सहते शब्दं नोच्चैर्द्रवति शूल्यते । हृदयं ताम्यति स्वल्पचेष्टस्यापि रसक्षये ।। च. सू. १७/६४ <br> रसक्षये हृत्पीडा कम्प:शून्यता तृष्णा च । सु. सू. १५/१३ <br> शब्दासहत्व हृदयद्रवकम्पशोषशूल शून्यतास्पंदन घट्टनैरल्पयाऽपि च चेष्ट्या श्रमतर्षाभ्याम् रस:।। अ. सं. सू. १९/१० | रसोऽतिवृद्धौ हृदयोत्क्लेदं प्रसेकं चापादयाति ।। सु. सू. १५/१८ <br> प्रसेकारोचकास्यवैरस्य हृल्लास स्त्रोतोरोध स्वादुद्वेषअंगमर्दादिभिरन्यैश्च श्लेष्मविकारप्रायै रस:।। अ. सं. सू. १९/७ |
| २) रक्त – <br> चरक–परूषा स्फुटिताम्लानात्वग्रूक्षा रक्तसंक्षये।। च. सू. १७/६५ <br> शोणितक्षये त्वक्पारूष्यमम्लशीत प्रार्थना सिराशैथिल्यं च ।। सु. सू. १५/१३ <br> त्वग्रौक्ष्याम्लशीताभिलाषसिरा शैथिल्यैरसृक् ।। अ. सं. सू. १९/१० | रक्तं रक्ताङ्गाक्षितां सिरापूर्णत्वं च । सु. सू. १५/१८ <br> कुष्ठ विसर्प पिटिका असृग्दराक्षिमुखमेढ्रगुदाह प्लीहगुल्म विद्रधिव्यङ्गकामलाग्निनाशतम: प्रवेश रक्ताङ्गनेत्रता वातरक्तपित्तादिभिरन्यैश्च पित्तविकार प्रायै:असृक। अ. सं. सू. १९/७ |
| ३) मांस – <br> मांसक्षये विशेषेण स्फिग्ग्रीवोदरशुष्कता।। च. सू. १७/६५ <br> मांसक्षये स्फिग्गण्डौष्ठोपस्थोरूवक्ष: कक्षापिण्डिकोदरग्रीवाशुष्कता रौक्ष्यतोदौ गात्राणां सदनं धमनी शैथिल्यं च । सु. सू. १५/१३ <br> स्फिग्गण्डादिशुष्कतातोदरौक्ष्याक्ष ग्लानिसन्धिस्फोटनधमनी शैथिल्यैर्मांसम् ।। अ. सं. सू. १९/१० | मांस स्फिग्गण्डौष्ठोपस्थोरूबाहु जङ्घासु वृद्धिं गुरूगात्रतां च । सु. सू. १५/१८ <br> गलगंडगंडमालार्बुदग्रन्थितालु जिव्हा कण्ठरोगस्फिग्गण्डौष्ठबाहुदरोरूजंघागौरव वृद्धिभि: श्लेष्मरक्तविकार प्रायैश्च मांसम्।। अ. सं. सू. १९/७ |

| क्षय | वृद्धि |
|---|---|
| ४) मेद –<br>सन्धीनां स्फुटनं ग्लानिरक्ष्णोरायास एव च<br>लक्षणं मेदसि क्षीणे तनुत्वं चोदरस्य च ।।<br>च. सू. १७/६६<br>मेद: क्षये प्लीहाभिवृद्धि: सन्धिशून्यता रौक्ष्यं<br>मेदुरमांसप्रार्थना च ।।<br>सु. सू. १५/२३<br>प्लीहवृद्धिकटिस्वाप संधिशून्यताङ्गरूक्षता<br>कार्श्यश्रमशोष मेदुरमांसाभिलाषै: मांसक्षयोक्तैश्च<br>मेद: ।।<br>अ. सं. सू. १९/१० | मेद: स्निग्धाङ्गतामुदरपार्श्ववृद्धिं कासश्वासादीन्<br>दौर्गन्ध्यं च ।।<br>सु. सू. १५/१८<br>प्रमेहपूर्वरूपै: स्थौल्योपद्रवैश्चान्यैरपि<br>श्लेष्मरक्तमांसविकार प्रायैर्मेद: ।।<br>अ. सं. सू. १९/७ |
| ५) अस्थि –<br>केशलोमनखश्मश्रुद्विजप्रपतनं श्रम:।<br>ज्ञेयमस्थिक्षये लिङ्गंसन्धीशैथिल्यमेव च ।।<br>च. सू. १७/६७<br>अस्थिक्षयेऽस्थिशूलं दन्तनखभङ्गोरौक्ष्यं च।।<br>सु. सू. १५/१३<br>दन्तनखरोमकेशशातन रौक्ष्य पारूष्य संधि<br>शैथिल्यास्थितोदास्थि बद्धमांसभिलाषैरस्थि ।।<br>अ. सं. सू. १९/१० | अस्थ्यध्यस्थीन्यधिदन्तांश्च ।।<br>सु. सू. १५/१८<br>अध्यस्थिभिरधिदंतैश्चास्थि ।।<br>अ. सं. सू. १९/७ |
| ६) मज्जा –<br>शीर्यन्त इव चास्थीनि दुर्बलानि लघूनि च<br>प्रततं वातरोगीणि क्षीणे मज्जनि देहिनाम् ।।<br>च. सू. १७/६८<br>मज्जक्षयेऽल्पशुक्रता पर्वभेदोऽस्थि<br>निस्तोदोऽस्थिशून्यता च ।।<br>सु. सू. १५/१३<br>अस्थिसौषिर्य निस्तोद दौर्बल्य<br>भ्रमतमोदर्शनैर्मज्जा ।।<br>अ. सं. सू. १९/१० | मज्जा सर्वाङ्गनेत्र गौरवं च ।।<br>सु. सू. १५/१८<br>नेत्रांगरक्त गौरवै:पर्वसु च स्थूलमूलारूभिर्मज्जा ।।<br>अ. सं. सू. १९/७ |
| क्षय | वृद्धि |

| | |
|---|---|
| ७) शुक्र –<br>दौर्बल्यं मुखशोषश्च पाण्डुत्वं सदनं श्रम:।<br>क्लैब्यं शुक्राविसर्गश्च क्षीणशुक्रस्य लक्षणम् ।।<br>च. सू. १७/६९<br>शुक्रक्षये मेढ्रवृषणवेदनाऽशक्तिर्मैथुने चिराद्वा प्रसेक: प्रसेकेचाल्परक्तशुक्रदर्शनम्।।<br>सु. सू. १५/१३<br>श्रमदौर्बल्यास्यशोषतिमिरदर्शनाङ्गमर्द पाण्डुता सदन क्लैब्यमुष्कतोदमेढ्रधूमायनै:<br>चिराच्च निषेकेण सरक्तनिषेकेण वा शुक्रम ।।<br>अ. सं. सू. १९/१० | शुक्रं शुक्राश्मरीमतिप्रादुर्भावं च ।।<br>सु. सू. १५/१८<br>अतिस्त्रीकामिता शुक्राश्मरी संभवाभ्यां शुक्राधिक्यम् ।।<br>अ. सं. सू. १९/१३ |
| ८) पुरीष –<br>क्षीणे शकृति चान्त्राणि पीडयन्निव मारूत:। रूक्षस्योन्नमयन् कुक्षिंतिर्यगूर्ध्वं च गच्छति।।<br>च. सू. १७/७०<br>पुरीषक्षयैहृदयपार्श्वपीडा सशब्दस्य च वायोरूर्ध्वगमनं कुक्षौ सञ्चरणं च ।।<br>सु. सू. १५/१५<br>सशब्दस्यवायो: कुक्षौतिर्यगूर्ध्वं च भ्रमणेनान्त्रवेष्टनेन पार्श्वहृदयपीडनेन अल्पतया च शकृत् ।।<br>अ. सं. सू. १९/११ | पुरीषमाटोपं कुक्षौ शूलं च ।।<br>सु. सू. १५/१९<br>कुक्षिशूलाटोप गौरवै: शकृदाधिक्यम् ।।<br>अ. सं. सू. १९/८ |
| ९) मूत्र –<br>मूत्रक्षये मूत्रकृच्छ्रं मूत्रवैवर्ण्यमेव च<br>पिपासा बाधते चास्य मुखं च परिशुष्यति ।।<br>च. सू. १७/७१<br>मूत्रक्षये बस्तितोदोऽल्पमूत्रता च । अत्रापि स्वयोनिवर्धन द्रव्योपयोग :।।<br>सु. सू. १५/१५<br>बस्तिनिस्तोद मुखशोष कृच्छ्राल्पविवर्णमूत्रतादिभि: सरूधिरमूत्रतया वा मूत्रम् ।।<br>अ. सं. सू. १९/११ | मूत्रं मूत्रवृद्धिं मुहुर्मुह: प्रवृत्तिं बस्तितोदमाध्मानं च ।।<br>सु. सू. १५/१९<br>बस्तितोदाध्मानैर्मूत्राधिक्यम् ।।<br>अ. सं. सू. १९/८ |
| क्षय | वृद्धि |

| | |
|---|---|
| १०) स्वेद –<br>स्वेदक्षये स्तब्धरोमकूपता त्वक्शोष:<br>स्पर्शवैगुण्यं स्वेदनाशश्च; तत्राभ्यङ्ग:<br>स्वेदोपयोगश्च।। सु. सू. १५/१५<br>स्तब्धरोमतारोमच्यवनत्वक्परिपाटन<br>स्वापपारूष्यस्वेदनाशै: स्वेद: ।।<br>अ. सं. सू. १९/११ | स्वेदस्त्वचोदौर्गन्ध्यं कण्डूं च।।<br>सु. सू. १५/१९<br><br>कण्डूदौर्गंध्यै:स्वेद:।।<br>अ. सं. सू. १९/८ |
| ११) ओज –<br>बिभेति दुर्बलोऽभीक्ष्णं ध्यायति<br>व्यथितेन्द्रिय: । दुश्छायोदुर्मना रूक्ष :<br>क्षामश्चैवौजस: क्षये ।। च. सू. १७/७३<br><br>बिभेति दुर्बलोऽभीक्ष्णं ध्यायति<br>व्यथितेन्द्रिय:। दुश्छायोदुर्मना रूक्षो भवेत्<br>क्षामश्च तत्क्षये ।। अ. सं. सू. १९/३८<br><br>बलविस्त्रंसलक्षणे – विश्लेषसादौ गात्राणां दोष<br>विस्त्रंसनं श्रम:। अप्राचुर्यं क्रियाणां च बलविस्त्रंस<br>लक्षणम् ।। सु. सू. १५/३०<br>बलव्यापद् – गुरूत्वं स्तब्धताऽङ्गेषु ग्लानिर्वर्णस्य<br>भेदनम् ।।<br>तन्द्रानिद्रा वातशोफो बलव्यापदि लक्षणम्।<br>सु. सू. १५/३१<br>बलक्षय– मूर्च्छा मांसक्षयोमोह: प्रलोपोऽ ज्ञानमेव<br>च ।। पूर्वोक्तानि च लिङ्गानि मरणं च बलक्षये ।।<br>सु. सू. १५/३२ | |
| १२) आर्तव –<br>आर्तवक्षये यथोचितकालादर्शनमल्पता वा<br>योनिवेदना च ।। सु. सू. १५/१ | आर्तवमङ्गमर्दमतिप्रवृत्तिं दौर्गन्ध्यं च ।।<br>सु. सू. १५/२० |

निष्कर्ष : –

# दशविध परीक्षा –

## १) प्रकृति – शारीर एवं मानस :

**कफ प्रकृति लक्षणानि –**

श्लेष्मा हि स्निग्धश्लक्ष्ण मृदुमधुरसारसान्द्रमन्दस्तिमितगुरूशीतविज्जलाच्छ:। तस्य स्नेहाच्छ्लेष्मला:,स्निग्धाङ्गा:,श्लक्ष्णत्वाच्छ्लक्ष्णाङ्ग: मृदुत्वाद् दृष्टिसुखसुकुमारावदातगात्रा :, माधुर्यात् प्रभूतशुक्रव्यवायापत्या:, सारत्वात् सारसंहतस्थिरशरीरा:, सान्द्रत्वादुपचितपरिपूर्ण सर्वाङ्ग:, मन्दत्वान्मन्दचेष्टाहारव्याहारा:, स्तैमित्यादशीघ्रारम्भक्षोभविकारा:, गुरूत्वात् साराधिष्ठितावस्थितगतय:, शैत्यादल्पक्षुतृष्णासंतापस्वेददोषा:, विज्जलत्वात् सुश्लिष्टसारसन्धिबन्धना:, तथाऽच्छत्वात् प्रसन्नदर्शनानना:, प्रसन्नस्निग्धवर्णस्वराश्च भवन्ति। त एवंगुणयोगाच्छ्श्लेष्मला बलवन्तो वसुमन्तो विद्यावन्त ओजस्विन: शान्ता आयुष्मन्तश्च भवन्ति ।। च. वि. ८/९६

**पित्त प्रकृति लक्षणानि –**

पित्तमुष्णं तीक्ष्णं द्रवं विस्त्रमम्लं कटुकं च। तस्यौष्ण्यात् पित्तला भवन्त्युष्णासहा, उष्णमुखा :, सुकुमारावदातगात्रा:, प्रभूतपिप्लुव्यङ्गतिलपिडका:, क्षुत्पिपासावन्त:, क्षिप्रवलीपलितखालित्यदोषा:। प्रायोमृद्वल्पकपिलश्मश्रुलोमकेशाश्च:, तैक्ष्ण्यात्तीक्ष्णपराक्रमा:, तीक्ष्णाग्नय:, प्रभूताशनपाना: क्लेशासहिष्णवो, दन्दशूका:, द्रवत्वाच्छिथिलमृदुसन्धिमांसा:, प्रभूतसृष्टस्वेदमूत्रपुरीषाश्च:, विस्त्रत्वात् प्रभूतपूतिकक्षास्यशिर: शरीरगन्धा: कट्वम्लत्वादल्पशुक्रव्यवायापत्या: त एवंगुणयोगात् पित्तला मध्यबला मध्यायुषो मध्यज्ञानविज्ञानवित्तोपकरणवन्तश्च भवन्ति ।।

च. वि. ८/९७

**वात प्रकृति लक्षणानि –**

वातस्तु रूक्षलघुचलबहुशीघ्रशीतपरूषविशद:। तस्यरौक्ष्याद्वातला रूक्षापचिताल्पशरीरा: प्रततरूक्षक्षामसन्नसक्तजर्जरस्वरा जागरूकाश्च भवन्ति, लघुत्वाल्लघुचपलगतिचेष्टाहारव्याहारा: चलत्वादनवस्थितसन्ध्यक्षिभ्रूहन्वोष्ठजिव्हाशिर: स्कन्धपाणिपादा:, बहुत्वात् बहुप्रलापकण्डरासिराप्रताना:, शीघ्रत्वाच्छीघ्रसमारम्भक्षोभविकारा: शीघ्रत्रासरागविरागा: श्रुतग्राहिणोऽल्पस्मृतयश्च, शैत्याच्छीतासहिष्णव: प्रततशीतकोद्वेपकस्तम्भा: पारूष्यात् परूषकेशश्मश्रुरोमनखदशनवदनपाणिपादा:, वैशद्यात् स्फुटिताङ्गावयवा: सतत सन्धिशब्दगामिनश्च भवन्ति, त एवं गुणयोगाद्वातला: प्रायेणाल्पबलाश्चाल्पायुष: च अल्पापत्याश्चाल्पसाधनाश्चाल्पधनाश्च भवन्ति ।। च. वि. ८/९८

**निष्कर्ष : –**

## मानस प्रकृति

## सात्विक सत्वभेद

**ब्राह्म सत्व** –शुचिं सत्याभिसन्धं जितात्मानं संविभागिनं ज्ञानविज्ञान वचन प्रतिवचन संपन्नं स्मृतिमन्तं कामक्रोधलोभमानमोहेर्ष्याहर्षामर्षापेतं समं सर्वभूतेषु ब्राह्मंविद्यात् ।

च. शा. ४/३६

– शौचमास्तिक्यमभ्यासो वेदेषु गुरूपूजनम्।
प्रियातिथित्वमिज्या च ब्रह्मकायस्य लक्षणम् ।।

सु. शा. ४/८१

– तपः सत्यदयाशौचदानशीलरतं समम्। ज्ञानविज्ञान सम्पन्नं ब्राह्मं विद्याज्जितेन्द्रियम्।

का. सं. सू. २८

**आर्षसत्व** – इज्याध्ययनव्रतहोमब्रह्मचर्यपरमतिथिव्रतमुपशान्तमदमानरागद्वेषमोहलोभरोषं प्रतिभावचनविज्ञानोपधारणशक्तिसंपन्नमार्षं विद्यात् ।।

च. शा. ४/३७

– जपव्रतब्रह्मचर्यहोमाध्ययनसेविनम्। ज्ञानविज्ञानसंपन्नमृषिसत्वं नरं विदुः।।

सु. शा ४/८७

– शौचव्रतेज्याध्ययनब्रह्मचर्यदयापरम्। जितमानमदक्रोधं वक्तारं चार्षमादिशेत्।

का. सं. सू. २८

**ऐन्द्र सत्व** – ऐश्वर्यवन्तमादेयवाक्यं यज्वानं शूरमोजस्विनं तेजसोपेतमक्लिष्टकर्माणं दीर्घदर्शिनं धर्मार्थकामाभिरतमैन्द्रं विद्यात् ।।

च. शा. ४/३८

– माहात्म्यं शौर्यमाज्ञा च सततं शास्त्रबुद्धिता। भृत्यानां भरणं चापि माहेन्द्रं कायलक्षणम्

सु.शा ४/८२

– त्रिवर्गनित्यं विद्वांसं शूरमक्लिष्टकारिणम्। प्राहुरैन्द्रं महाभागमधिष्ठातारमीश्वरम्।

का. सं. सू. २८

**याम्य सत्व** – लेखास्थवृत्तं प्राप्तकारिणमसंप्रहार्यमुत्थानवन्तं स्मृतिमन्तमैश्वर्य लम्भिनं व्यपगतरागेर्ष्या द्वेषमोहं याम्यं विद्यात् ।

च. शा. ४/३९

– प्राप्तकारी दृढोत्थानो निर्भयः स्मृतिमाञ्छुचिः। रा गमोहमदद्वेषैर्वर्जितो याम्यसत्ववान् ।।

सु. शा. ४/८६

– त्यक्तदम्भभयक्रोधं प्राप्तकरिणमीश्वरम् । समं मित्रे च शत्रौ च याम्यं विद्यात् सुनिश्चितम्।।

का. सं. सू. २८

**वारूण सत्व** –शूरं धीरं शुचिमशुचिद्वेषिणं यज्वानमम्भोविहाररतिमक्लिष्टकर्माणं

स्थानकोपप्रसादं वारूणं विद्यात् ।     च. शा. ४/४०

– शीतसेवा सहिष्णुत्वं पैङ्गल्यं हरिकेशता । प्रियवादित्वमित्येतद्वारूणं कायलक्षणम् ।।     सु. शा. ४/८३

– अशुचिविशुचि: शूर: शीघ्रक्रोधप्रसादवान्। पुण्यशीलो महाभागो वारूणो वरूणप्रिय:।     का. सं. सू. २८

**कौबेर सत्व** – स्थानमानोपभोगपरिवारसंपन्नं धर्मार्थकामनित्यं शुचिं सुखविहारं व्यक्तकोपप्रसादं कौबेरं विद्यात् ।     च. शा. ४/४१

– मध्यस्थता सहिष्णुत्वमर्थ स्यागमसंचयौ। महाप्रसवशक्तित्वं कौबेरं कायलक्षणम् ।।     सु. शा. ४/८४

– स्थानमानपरीचारधर्मकामार्थलोभिनम्। क्रोधप्रसादफलदं कौबेरं प्राहुरूर्जितम् ।     का. सं. सू. २८

**गान्धर्व सत्व** –प्रियनृत्यगीतवादित्रोल्लापकश्लोकाख्यातयिकेतिहासपुराणेषु कुशलं गन्धमाल्यानुलेपनवसनस्त्रीविहारकामनित्यमनसूयकं गान्धर्वं विद्यात ।     च. शा. ४/४२

– गन्धमाल्यप्रियत्वं च नृत्यवादित्रकामिता। विहारशीलता चैव गान्धर्वं कायलक्षणम् ।     सु. शा. ४/८५

– श्लोकाख्यानेतिहासज्ञं गन्धमाल्याम्बरप्रियम्।नृत्तगीतोपहासज्ञं गान्धर्व सुभगं विदु:।     का. सं. सू. २८

**प्रजापति सत्व** – एतत् कल्याणभूयिष्ठं शुध्दं सत्वमिहाष्टधा। प्रजावन्तं क्रियावन्तं धर्मशीलं जगत्प्रियम्।अनीर्ष्यमशठं प्राज्ञ: प्राजापत्यं वेदच्छुचिम् ।।     का. सं. सू. २८

## राजस सत्वभेद

**आसुर सत्व** – शूरं चण्डमसूयकमैश्वर्यवन्तमौपधिकं रौद्रमननुक्रोशमात्मपूजकमासुंर विद्यात् ।।     च. शा. ४/४३

– ऐश्वर्यवन्तं रौद्रं च शूरं चण्डमसूयकम्।एकाशिनं चौदरिकमासुरं सत्त्वमीदृशम् ।।     सु. शा. ४/८८

– ईश्वरोऽसूयक श्चण्ड आत्मपूजोपधिप्रिय:। सानुक्रोशभयो रौद्रोहन्ता शूरस्तथाऽऽसुर:।     का. सं. सू. २८

**राक्षस सत्व** – अमर्षिणमनुबन्धकोपं छिद्रप्रहारिणं क्रूरमाहारातिमात्ररूचिमामिषप्रियतमं स्वप्नायासबहुलमीर्ष्युं राक्षसं विद्यात्।     च. शा.४/४४

– एकांन्तग्राहिता रौद्रमसूया धर्मबाह्यता। भृशमात्रं तमश्चापि राक्षसं कायलक्षणम्। सु. शा . ४/८९

– क्रुरश्छिद्रप्रहारी च रोषेर्ष्यामर्षसन्तत:। वैरमांसाशनायास: कलहार्थी च राक्षस:।। का. सं. सू. २८

**पैशाच सत्व –** महाशनं स्त्रैणं स्त्रीरहस्कामम‌शुचिं शुचिद्वेषिणं भीरू भीषयितारं विकृतिविहार आहारशीलं पैशाचं विद्यात् । च. शा.४/४५

– उच्छिष्टाहारता तैक्ष्ण्यं साहसप्रियता तथा। स्त्रीलोलुपत्वं नैर्लज्ज्यं पैशाचं कायलक्षणम् । सु. शा . ४/९०

– शुचिद्विडशुचि: क्रूरोऽभीरूर्भीषयिताऽऽविल:। मद्यमांसप्रिय:शङ्की पैशाचो बहुभोजन:।। का. सं. सू. २८

**सार्पसत्व** – क्रुध्दशूरम क्रुध्दभीरू तीक्ष्णमायासबहुलं संत्रस्तगोचरमाहारविहारपरं सार्प विद्यात् । च. शा.४/४६

– तीक्ष्णमायासिनं भीरू चण्डं मायान्वितं तथा । विहाराचारचपलं सार्पसत्वं विदुर्नरम् ।। सु. शा. ४/९१

– तीक्ष्णमायासबहुलं निद्रालुं बहुवैरिणम्। अक्रुद्धभीरू स्त्रैणं च सार्पं नित्यौष्ठलेहिनम् ।। का. सं. सू. २८

**प्रैतसत्व –** आहारकाममतिदु:खशीलाचारोपचारमसूयकमसंविभागिनमतिलोलुपमकर्मशीलं प्रैतं विद्यात।। च. शा.४/४७

– असंविभागमलसं दु:खशीलमसूयकम्। लोलुपं चाप्यदातारं प्रेतसत्वं विदुर्नरम् । सु. शा. ४/९२

– अहंकृता महाहारा वैरिणो विकृतानना:। विरूपा विकृतात्मानो भूतसत्वा निशाप्रिया:। का. सं. सू. २८

**शाकुन सत्व**–अनुषक्त काममजस्त्रमाहारविहारपरमनवस्थितममर्षणमसंचयं शाकुनं विद्यात् । च. शा.४/४८

– प्रवृद्धकामसेवी चाप्यजस्त्राहार एव च । अमर्षणोऽनवस्थायी शाकुनं

कायलक्षणम् ।   सु. शा. ४/९३

– अमर्षिकुत्सिताहांर (वाग्घूनं) नित्यशङ्कितम् । चलं दुर्मेधसं भीरू शाकुनं विद्धयनोकसम्।   का. सं. सू. २८

**याक्षसत्व** – दानशय्यात्यलङ्कारपान भोजनमैथुनैः। नित्योपेतं प्रमुदितं याक्षं विद्यात् प्रभक्षणम् ।   का. सं. सू. २८

**तामस सत्वभेद**

पाशव सत्व – निराकरिष्णुममेधसं जुगुप्सिताचाराहांर मैथुनपरं स्वप्नशीलं पाशवं विद्यात्।   च. शा.४/४९

– दुर्मेधस्त्वं मन्दता च स्वप्ने मैथुननित्यता। निराकरिष्णुता चै विज्ञेयाः पाशवा गुणाः।   सु. शा. ४/९४

– आहारमैथुनपरं स्वप्नशीलम मेधसम् ।अथैवं पाशवं विद्यान्मृजालङ्कार वर्जितम्।   का. सं. सू. २८

**मात्स्य सत्व** – भीरूमबुधमाहारलुब्धमनवस्थितमनुषक्तकामक्रोधं सरणशीलं तोयकामं मात्स्यं विद्यात् ।   च. शा. ४/५०

– अनवस्थितता मौर्ख्यं भीरूत्वं सलिलार्थिता । परस्पराभिमर्दश्च मात्स्य सत्वस्य लक्षणम् ।।   सु. शा. ४/९५

–भीरूमप्रज्ञमाद्यूनं कामक्रोधवशं गतम्।हिस्त्रंमात्मपरं विद्यान्मात्स्यं सुप्रजसं शठम् ।   का. सं. सू. २८

**वानस्पत्य सत्व** – अलसं केवलमभिनिविष्टमाहारे सर्वबुध्दयङ्गहीनं वानस्पत्यं विद्यात्।   च. शा.४/५१

– एकस्थानरतिर्नित्यमाहारे केवले रतः । वानस्पत्यो नरः सत्वधर्मकामार्थवर्जितः।   सु.शा. ४/९६

– वधबन्धपरिक्लेशशीतवातातपैः समम्। बुध्यङ्गहीनम् अलसं वानस्पत्यं वदेदृजुम्।   का. सं. सू. २८

निष्कर्ष : –

## २) सार परीक्षणानि –

**त्वक्सार पुरूष लक्षणानि –**

तत्र स्निग्धश्लक्ष्णमृदुप्रसन्नसूक्ष्माल्पगम्भीरसुकुमारलोमा सप्रभेव च त्वक् त्वक्साराणाम् ।
सा सारता सुखसौभाग्यैश्वर्योपभोगबुद्धिविद्यारोग्य प्रहर्षणान्ययुष्यत्वं चाचष्टे ।।

च. वि. ८/१०३

**रक्तसार पुरूष लक्षणानि –**

कर्णाक्षिमुखजिव्हानासौष्ठपाणिपादतलनखललाटमेहनं स्निग्धरक्तवर्णं श्रीमभ्द्राजिष्णु रक्तसाराणाम्।
सा सारता सुखसमृद्धतां मेधां मनस्वित्वं सौकुमार्यमनतिबलमक्लेशसहिष्णुत्वमुष्णासहिष्णुत्वं चाचष्टे ।।

च. वि. ८/१०४

**मांससार पुरूष लक्षणानि –**

शङ्खललाटकृकाटिकाक्षिगण्ड हनुग्रीवास्कन्धोदरकक्षवक्ष: पाणिपादसन्धय : स्थिरगुरूशुभमांसोपचिता मांससाराणाम् ।
सा सारता क्षमां धृतिमलौल्यं वित्तं विद्यां सुखमार्जवमारोग्यं बलमायुश्च दीर्घमाचष्टे ।।

च. वि. ८/१०५

**मेदसार पुरूष लक्षणानि –**

वर्णस्वरनेत्रकेशलोमनखदन्तौष्ठमूत्रपुरीषेषु विशेष: स्नेहो मेद: साराणाम् ।।
सा सारता वित्तैश्वर्यसुखोपभोगप्रदानान्यार्जवं सुकुमारोपचारतां चाचष्टे ।।

च. वि. ८/१०६

**अस्थिसार पुरूष लक्षणानि –**

पार्ष्णिगुल्फजान्वरत्निजत्रुचिबुकशिर: पर्वस्थूला : स्थूलास्थिनखदन्ताश्चास्थिसारा: ।।
ते महोत्साहा: क्रियावन्त: क्लेशसहा: सारस्थिरशरीरा भवन्त्यायुष्मन्तश्च ।।

च. वि. ८/१०७

**मज्जासार पुरूष लक्षणानि –**

मृद्वङ्गा बलवन्त: स्निग्धवर्णस्वरा: स्थूलदीर्घवृत्तसन्धयश्च मज्जसारा :।
ते दीर्घायुषो बलवन्त: श्रुतवित्तविज्ञानापत्यसंमानभाजश्च भवन्ति ।।

च. वि. ८/१०८

**शुक्रसार पुरूष लक्षणानि–**

सौम्या : सौम्यप्रेक्षिण : क्षीरपूर्णलोचना इव प्रहर्षबहुला : स्निग्धवृत्तसारसमसंहतशिखरदशना: प्रसन्नस्निग्धवर्णस्वरा भ्राजिष्णवो महास्फिचश्च शुक्रसारा : ।
ते स्त्रीप्रियोपभोगा बलवन्त: सुखैश्वर्यारोग्यवित्तसंमानापत्यभाजश्च भवन्ति ।।

च. वि. ८/१०९

**सत्वसार पुरूष लक्षणानि–**

स्मृतिमन्तो भक्तिमन्त: कृतज्ञा: प्राज्ञा: शुचयो महोत्साहा दक्षा धीरा: समरविक्रान्त योधिनस्त्यक्तविषादा: सव्यवस्थितगतिगम्भीरबुद्धिचेष्टा: कल्याणाभिनिवेशिनश्च सत्वसारा : ।।

च. वि. ८/११०

**निष्कर्ष :**

## ३) संहनन परीक्षणानि–

संहननतश्चेति संहननं, संहति: संयोजनमित्येकोऽर्थ :। तत्र समसुविभक्तास्थि, सुबद्धसन्धि, सुनिविष्टमांसशोणितं, सुसंहतं शरीरमित्युच्यते । तत्र सुसंहत: शरीरा: पुरूषा बलवन्त:, विपर्ययेणाल्पबला: मध्यत्वात् संहननस्य मध्यबला भवन्ति ।

च. वि. ८/११६

**निष्कर्ष :**

### ४) प्रमाण (प्राकृत) परीक्षणानि –

| | | |
|---|---|---|
| पाद | – | उत्सेध – ४ अंगुल, विस्तार– ६ अंगुल, आयाम – १४ अंगुल |
| जङ्घा | – | आयाम –१८ अंगुल, परीक्षेप – १६ अंगुल |
| जानु | – | आयाम – ४ अंगुल, परीक्षेप – १६ अंगुल |
| उरू | – | परीक्षेप – ३० अंगुल, आयाम –१८ अंगुल |
| वृषण | – | आयाम –६ अंगुल, परीक्षेप – ८ अंगुल |
| शेफ | – | आयाम – ६ अंगुल, परीणाह – ५ अंगुल |
| भग | – | परीणाह – १२ अंगुल |
| कटी | – | विस्तार–१६ अंगुल |
| शिर | – | विस्तार–१० अंगुल |
| उदर | – | आयाम –१२ अंगुल, विस्तार –१० अंगुल |
| पार्श्व | – | विस्तार–१० अंगुल, आयाम – १२अंगुल |
| द्वौस्तनान्तरौ | – | १२ अंगुल |
| स्तनपर्यन्तम् | – | २ अंगुल |
| उर | – | विशाल –२४ अंगुल, उत्सेध – १२अंगुल |
| हृदय | – | २ अंगुल |
| स्कन्ध | – | ८ अंगुल |
| अंस | – | ६ अंगुल |
| प्रबाहू | – | १६ अंगुल |
| प्रपाणी | – | १५ अंगुल |
| हस्त | – | १२ अंगुल |
| कक्षा | – | ८ अंगुल |
| त्रिक | – | १२ अंगुल |
| पृष्ठ | – | उत्सेध – १८ अंगुल |

शिरोधरा (मान)– उत्सेध – ४ अंगुल, परीणाह – २२ अंगुल

आनन (मुखमण्डल) –उत्सेध – १२ अंगुल, परीणाह – २४ अंगुल

मुख – आयाम – ५ अंगुल

चिबुक, ओष्ठ, कर्ण, अक्षि, मध्यनासिका, ललाट– आयाम प्रत्येकी ४ अंगुल

शिर – उत्सेध – १६ अंगुल, परीणाह – ३२ अंगुल

संपूर्ण शरीर आयामानि – ८४ अंगुल

निष्कर्ष :-

## ५) सत्व परीक्षणानि –

**प्रवर –**

तत्र प्रवरसत्वाः सत्वसारास्ते सारेषूपदिष्टाः स्वल्पशरीरा ह्यपि ते निजागन्तुनिमित्तासु महतीष्वपि पीडास्वव्यथा दृश्यन्ते सत्वगुणवैशेष्यात् ।।

च. वि. ८/११९

**मध्य –**

मध्यसत्वास्त्वपरानात्मन्युपनिधाय संस्तम्भयन्त्यात्मनाऽऽत्मानं परैर्वाऽपिसंस्तम्भ्यन्ते।।

च. वि. ८/११९

**हीन –**

हीनसत्वास्तु नात्मना नापि परैः सत्वबलं प्रति शक्यन्ते उपस्तम्भयितुं महाशरीरा ह्यपि ते स्वल्पानामपि वेदनानामसहा दृश्यन्ते, सन्निहितभयशोकलोभमोहमाना रौद्रभैरवद्विष्टबीभत्सविकृतसंकथास्वपि च पशुपुरूषमांसशोणितानि चावेक्ष्य विषादवैवर्ण्यमूर्च्छोन्माद भ्रमप्रपतनानामन्यतममाप्नुवन्त्यथवा मरणमिति ।।

च. वि. ८/११९

निष्कर्ष :

## ६) सात्म्यत: –

| | | |
|---|---|---|
| आहार | – | द्रव्यत: – |
| | | गुणत:– |
| | | रसत : – |
| विहार | – | गुणत:– |
| औषध, व्यसन | – | द्रव्यत: – |
| | | गुणत:– |
| | | रसत : – |

निष्कर्ष :

## ७) आहारशक्ति परीक्षणानि –

| | | |
|---|---|---|
| अभ्यवहरणशक्ति | – | अग्निपरीक्षणानि |
| जरणशक्ति | – | कोष्ठपरीक्षणानि |

निष्कर्ष :

## ८) व्यायामशक्ति परीक्षणानि –

## ९) वय (अवस्था) परीक्षणानि –

## १०) विकृती –

**विकृत हेतू –**

**आहारत: –**
**विहारत: –**
**मानस –**

**दोष –**
**दूष्य –**
**प्रकृति –**
**देश –**
**काल –**
**बल –**
**लिङ्ग –**

## अष्टविध परीक्षणानि –

## १) नाडी

**गती –**
**स्वरूप –**

| | | |
|---|---|---|
| वात | – | सर्प, जलौकादी गति |
| पित्त | – | काक लावक मण्डूकादेस्तथा चपलाम् । |
| कफ | – | राजहंस मयूराणां पारावतकपोतयो: कुक्कुटस्य गति । |
| वातपित्त | – | मुहु सर्पगतिं नाडीं मुहुर्भेकगति तथा । |
| वात कफ | – | सर्पहंसगतिं |
| पित्त श्लेष्म | – | हरिहंस गतिं |
| सन्निपातिक | – | काष्ठकुट्टो यथा काष्ठं कुट्टते चातिवेगवत । स्थित्वा स्थित्वा तथा |
| आमज | – | गरीयसीं |
| रक्तपूर्ण | – | उष्णा गुर्वी |

## २) मल

| | | |
|---|---|---|
| वातात् | – | मले तु दृढता शुष्कता चापि जायते /त्रुटितं फेनिलं रूक्षं धूमलं /कृष्णवर्ण |
| पित्तात | – | पीतता जायते |
| श्लेष्म | – | शुक्लता भवेत्। रक्तवर्णं मलं किञ्चित मलं श्वेतं |
| सन्निपाते | – | सर्वाणि लक्षणानि भवन्ति |
| वातश्लेष्म | – | कपिशं मलम् |
| पित्तानिल | – | बध्दं सुत्रुटितं पीतश्याम् |
| श्लेष्मपित्त | – | पीतश्वेतं ईषद सान्द्रं च पिच्छिलम् |
| त्रिदोष | – | श्यामं त्रुटितपीताभं बद्ध श्वेतं |
| जीर्णमल | – | दुर्गंध शीतलश्चैव विष्ठा |
| क्षीणमल | – | कपिल गुटियुक्तं |
| आमाज | – | पीतं स कटिवेदनम्,मज्जत्यामात् गुरूत्वात्,भूमौ पतितं लीनं भवति, विप्लुतम् |
| पक्व | – | स्वच्छ मलं भवेत्, तूत्प्लवते जले |
| तीक्ष्णाग्नि | – | पिण्डितं शुष्कं |
| मन्दाग्नि | – | द्रवीकृतम् |

## ३) मूत्र

| | | | |
|---|---|---|---|
| वात | – | पाण्डुर | अन्य मत नीलं च रूक्षं |
| पित्त | – | रक्तवर्ण | अन्य मत पीत अरूण तैलसमं |
| कफ | – | सफेन | अन्य मत स्निग्धं पल्वल (पोखरी) |
| पित्तवात | – | धूम्रजलाभ, उष्ण | |
| वात कफ | – | श्वेत, बुदबुद | |
| कफपित्त | – | कलुषं सरक्त | |
| सन्निपात | – | कृष्ण | |
| रक्तज | – | स्निग्ध उष्ण रक्त | |

## तैलबिन्दु परीक्षा

| | | |
|---|---|---|
| पूर्व | – | शीघ्रं सुखी भवेत् |
| दक्षिण | – | ज्वरो ज्ञेयस्तथाऽऽरोग्यं क्रमादभवेत् |
| उत्तर | – | अरोगिता तदा नूनं पुरूषस्य न संशय: |
| पश्चिम | – | सुखारोग्यं तदाऽऽदिशेत् |
| ईशान्य | – | मासेन नश्यति |
| आग्नेय वा नैऋत्य | – | छिद्रितस्य भवेत्पश्चाद ध्रुंव मरणमेव च । |
| वायव्य | – | सुधयापि विनश्यति |

### ४) जिव्हा

वात – शीता खरस्पर्शा स्फुटिता
पित्त – रक्ता श्यामा
कफ – शुभ्राऽतिपिच्छिला
सन्निपात – कृष्णा स कण्टका शुष्का
द्वन्द्वज – मिश्रित

### (आस्य परीक्षा )

वात – कषायत्वं, मधुरास्यत्वं,
शुष्कविरसमुखता, कण्ठास्यशोष

पित्त – कटुंक, तिक्त,
अरूचि, तृष्णा पिपासार्त,
न च आस्योष्णमुपशेतेऽ म्लमेव च

कफज – मधुराम्ल,
प्रसेक, अरोचक, आस्योपदेह

### ५) शब्द

कफज – गुरू स्वरो, मन्द
पित्तज – स्फुट वक्ता
वातज – उभाभ्यां रहितो, वैस्वर्यं, स्वरोपघात, जर्जर स्वर

### ६) स्पर्श

वातज – शीतल ; रूक्ष खरज्ञात्वा
पित्तज – भवेदुष्णो, स्पर्शरूक, स्विद्यते क्लिद्यते मृदु स्पर्श, सुकुमार
कफज – स भवेद्रार्द, गुरू स्तिमित स्थिर कठिण स्पर्श

### ७) दृक्

वात – रूक्षा धूम्रा तथा रौद्रा चला चान्त र्ज्वलत्यपि । विप्लुताक्ष, विकृताक्ष
पित्त – दीपद्वेषि च सन्तप्तं पीतं, अक्षिरागकृत
कफ – जलार्द्रं ज्योतिषा हीनं स्निग्ध मन्दं, शुक्लाक्षि, बहुपिच्छिलाश्रु गुरूता सकण्डू
द्वन्द्वज – भवेन्मिश्रं तूर्णं तूर्णं विलोचनम्
त्रिदोषज – श्यामवर्णं च निर्भुग्नं तन्द्रामोहसमन्वितम्। रौद्रं च रक्तवर्णं

## ८) आकृति

वातज – प्रायस्त एव पवनाध्युषिता मनुष्या दोषात्मका: स्फुटितधूसरकेशगात्रा:।
---------चेष्टा ------------- दृष्टिगतयोऽपि

पित्तज – गौरोष्णाङ्गताम्रहस्ताङ्घ्रिवक्त्र --------पिङ्गकेशोऽल्परोमा

कफज – गूढस्निग्धश्लिष्टसन्ध्यस्थिमांस । ------ क्लेशधमैरतप्तो बुध्दया युक्तो

## षड्विध परीक्षणानि –

१) ज्ञानेन्द्रिय परीक्षणानि –
- १) श्रोत्रेन्द्रिय
- २) स्पर्शनेन्द्रिय
- ३) चक्षुरेन्द्रिय
- ४) रसनेन्द्रिय
- ५) घ्राणेन्द्रिय

२) कर्मेन्द्रिय परीक्षणानि –
- १) वाक्
- २) पाणि
- ३) पाद
- ४) पायु
- ५) उपस्थ

३) मन: परीक्षणानि –

| Criteria | | Method of Testing |
|---|---|---|
| मेधा | → | ग्रहण सामर्थ्यात |
| संज्ञा | → | नामग्रहण सामर्थ्यात |
| स्मृति | → | स्मरण सामर्थ्यात |
| विज्ञान | → | व्यवसाय |
| श्रध्दा | → | अभिप्राय |
| अवस्थान (determination) | → | अविभ्रम |
| वीर्य | → | उत्तान |

| | | |
|---|---|---|
| धैर्य | → | अविशद |
| धृति | → | अलौल्य |
| शील | → | अनुशीलन |
| द्वेष | → | प्रीतषेध |
| प्रीती | → | तोष |
| हर्ष | → | indulge in activities like playing etc |
| राजस | → | संग |
| मोह | → | अविज्ञान |
| क्रोध | → | अभिद्रोह |
| भय | → | विशद |
| शोक | → | दैन्य |
| अमल सत्व | → | अविकार |
| श्रेयस | → | कल्याणभिनिवेश |

## त्रिदोष - मानस लक्षण

| वात | पित्त | कफ |
|---|---|---|
| चंचल चित्त | अमर्ष | अज्ञान |
| भय | क्रोध | आलस्य |
| शोक | मद | तमप्रवेश |
| दैन्य | तर्जन | तृप्ती |
| अधृति | अतृप्ती | नारी प्रीयता |
| प्रलाप | अरति | एकांत प्रीयता |
| अति शीघ्र चेष्टा | द्रवण | अल्प चेष्टा /अचेष्टा |
| अस्थान हास्य, नृत्य | नग्नभाव | |
